तैत्तिरीयसंहिता-पदपाठः

परिष्कर्त्तारौ

मु० अ० वै० अनन्तरामशास्त्री मा० नारायणशास्त्री च (1932)

--------------

श्रीः ॥

ओम् ॥

ब्रह्माब्जाक्षेशमूर्त्या रचयति जगतां सृष्टिरक्षाप्ययान् यः

यस्य स्तोतुं गुणोद्धानवयवमिलिता नेशते सर्वदेवाः ।

दीयन्ते येन नाम स्वमचलमनसा चिन्तयद्भ्यः पुमर्थाः

तं वन्दे कार्तिकेयद्विपमुखगिरिजावेष्टितं व्योमकेशम् ॥१॥

शेवधिर्यः पुमर्थानां षडध्वातीतविग्रहः ।

राद्धान्तो निगमार्थानां मोदतां स महेश्वरः ॥२॥

पदानां तैतिरीयाणां क्वाचित्कं लक्षणं मया ।

द्राविड्या टीकया साकं यथाशेमुषि लिख्यते ॥३॥

१ (हरिः ओ४म्) - अस्य च प्रणवस्य

“अद्ध्यायस्य मुखे चान्ते भूत्वा विद्वानतन्द्रितः । संरक्षणाय वेदानामोङ्कारं तूच्चरेत्सदा ॥

स्रवत्यादावनुक्ते च तस्यान्ते तु विशीर्यते । आद्यन्तप्रणवौ तस्य स्यातामङ्गानि वै ततः ॥”

“वेदस्योपक्रमे विद्वानवसानेऽप्यतन्द्रितः । उच्चरेत् प्रणवं ब्रह्म रक्षायै छन्दसां स्फुटम् ॥”

इत्यादिशिक्षावचनैः 1आदावन्ते च अवश्यमुच्चारणीयत्वं,

“यजुः प्रणव उच्चस्स्यात्” “मकारान्तो यजुष्युच्चः” “उदात्तो वाल्मीकेः” इत्यादिभिः 2उदात्तत्वं,

“प्रारम्भकश्चतुर्मात्रो वेदस्थस्स्यात्तदर्द्धकः । अद्ध्यायान्त्योऽनुवाकान्त्यः कर्माद्यश्च त्रिमात्रिकः ॥”

इत्यादिभिः 3चतुर्मात्रत्वं,

“सविसर्गं हरिपदं प्रणवात्पूर्वमिष्यते । हरिपदे विसर्गस्य न सन्धिः प्रणवोत्तरे”

इत्यनेन 4हरिपदपूर्वत्वं च निरणायि ॥

(1) (हरिः ओ४म्) - अयं प्रणवः उदात्तः चतसृभिः मात्राभिः उच्चारणीयः । यतः – (सर्वसम्मत+शीक्षा) ।

“यजुः प्रणव उच्चस्स्यात् स्वरितास्त्वोन्तदादि षट् । प्रारम्भकश्चतुर्मात्रो वेदस्थस्स्यात्तदर्द्धकः ॥

अद्ध्यायान्त्योऽनुवाकान्त्यः कर्माद्यश्च त्रिमात्रिकः ॥” इति ॥

{आदौ हरिपदं सर्वमुदात्तं प्रोच्यते बुधैः । अन्ते रिशब्दः स्वारः स्यात् विसर्गः प्रचयः स्मृतः ॥}

२ (1.1.1) 'उपायवः' इति पदमिङ्ग्यम् । अत्र शिक्षा - प्रग्रहेङ्ग्योपसर्गान्त इति स्यादप्यसांहिते' इति । अस्यार्थः - असांहिते – पदाद्ध्ययनादौ, प्रग्रहेङ्ग्योपसर्गान्ते 'ऊकारः, 'ओकारोऽसांहितोऽकारव्यञ्जनपरः' इत्यादिलक्षणलक्षिताः स्वराः

प्रग्रहाः, विभागवन्ति पदानि इङ्ग्यानि, आ, प्र, अव, इत्यादीनि पदानि उपसर्गाः, तेषाम् अन्ते, इति स्यात् इतिशब्दः प्रयोक्तव्य इत्यर्थः । शिक्षान्तरेऽपि - प्रग्रहेङ्ग्योपसर्गाणामितिशब्दः प्रयुज्यते । परस्तात्पदकालेऽयं पूर्वोच्चारण एव हि' इति ॥ पूर्वोच्चारण इत्यनेन इङ्ग्यादेः द्विरुच्चारणसम्भवे पूर्वोच्चारण एव इतिशब्दप्रयोगो विधीयते । इङ्ग्यादेः द्विरुच्चारणीयत्वादिकमुक्तं शिक्षायां - 'पुनस्त्विङ्ग्यं क्रमे चादिर्विरामस्थं द्विधैक्यतः' इति । अस्यार्थः - इङ्ग्यं - विभागवत् पदं, पुनः - पुनरुक्तं स्यादित्यर्थः । पदाद्ध्ययनादाविति शेषः । यथा । उपायव इत्युप-आयवः । आदिः पूर्वोक्ते प्रग्रहेङ्ग्योपसर्गान्त इतिपदे आदिभूतः प्रग्रह इत्यर्थः । स च प्रग्रहः क्रमे – क्रमाद्ध्ययने, चकारात् पुनरुक्तस्स्यादित्यर्थः । यथा । विष्णो इति विष्णो । विरामस्थं पदं क्रमाद्ध्ययने द्विधा - इतिशब्दमध्यं द्विरुक्तं स्यादित्यर्थः । यथा । पाहीति पाहि । ऐक्यतः - उक्तविशेषाः प्रग्रहादयः एकपदवदुच्चारणीया इत्यर्थः ॥

३ 'प्र' इति पदम् उपसर्गसंज्ञं भवति । उपसर्गाश्च परिगणिताः शिक्षायाम् - प्रोपावापर्यधिव्युत्सुन्यन्वपाप्यत्य भिप्रति । परानिस्सं नवदशाप्युपसर्गास्स्युरत्र हि' इति ॥ अस्यार्थः - प्र, उप, अव, आ, परि, अधि, वि, उत्, सु, नि, अनु, अप, अपि, अति, अभि, प्रति, परा, निः, सं, एते, नवदश - एकोनविंशतिः शब्दाः उपसर्गाः उपसर्गसंज्ञास्स्युः । उपसर्गा एते 'प्रग्रहेङ्ग्योपसर्गान्त इति स्यादप्यसांहिते । 'प्रग्रहेङ्ग्योपसर्गाणामितिशब्दः प्रयुज्यते । परस्तात्पदकालेऽय'मि-त्यादिशिक्षावचनैः पदाद्ध्ययने इतिशब्दान्ता भवन्ति ॥

४ (1.1.4) विष्णो इति पदं प्रग्रहान्तम् । प्रातिशाख्ये 'अथ प्रग्रहाः' इत्यादिभिः, व्यासशिक्षायां 'अथ प्रग्रह एवान्त' इत्यादिभिश्च लक्षणैर्लक्षिताः ईकारादयः स्वराः प्रग्रहसंज्ञा भवन्ति । एते च 'प्रग्रहेङ्ग्योपसर्गान्त इति स्यादप्यसांहिते', 'इतिपरोऽपि' (प्राति. अ-४, सू-४) इत्यादिवचनैः पदाद्ध्ययने इतिशब्दान्ता भवन्ति ॥

(1) (1.1.3) अत्र त्रिक्रम इति वदन्ति । क्रम इति संज्ञा । त्रयाणां पदानां क्रमः त्रिक्रमः । तस्य लक्षणमाह – (स+शी) । 'आकारान्तमुदात्तान्तमाङ्गरं यत्र दृश्यते । त्रिक्रमं तं विजानीयान्मोषूण ऊषुणस्तथा ॥१॥ मास्थान्महित्वना नाकं प्रियधा विशतेति च । मोषूणश्चार्यमा याति पूषाधत्ताप्यधत्तयुक् ॥२॥ दक्षिणावर्ततेत्याप्र ऋचासादयतीति च । भूत्वा हरच्च मावृक्षि भूताविश विशत्यपि ॥३॥ कृत्वाहरति धत्ते च लभते चोषुणस्तथा (त्रिक्रमाः स्मृताः) । दध्नातनक्ति चोद्गाता रोहतीति च विंशतिः ॥४॥' (संहितावत् क्रमे पूर्वं परं पदवदुच्यते ।) ॥{इतिगं त्वादि चेत् उक्ता द्वितीयं चोत्तरं तथा॥}

------

(1.1.21) (प्रातिशाख्यम्) १.४९ 'तस्य पूर्वपदमवग्रहः । '*வேஷ்டனபதத்தினுடைய பூர்வபாகத்திற்கு* (अवग्रहः) *என்று பெயர்.* (1) (प्राति) ३.३ 'इन्द्रा, व,द्व,न्वा,न्परः । 'इन्द्रा *என்கிற* (अवग्रह)*த்திற்கு* वत्, वन्, वान्, *இதுகள் பரத்தில் இருந்தால்* (ह्रस्व)*த்தையடையும்.* इन्द्रावतीम् । इन्द्रावन्तः । इन्द्रावान् ॥ (-इन्द्रावरुणयोः, इन्द्रासोमीयम्)

(1) (1.1.26) (सप्त+लक्षणम्) । 'ताः, न जोहवीमि, परि, सोमस्य, वृणे, सर्वे, वो, ग्रा, स्थ, पूर्वः' जोहवीमि, परि, सोमस्य, वृणे, सर्वा, इव, उग्रा, स्थ, *இந்த பதங்கள் பூர்வத்தில் இருந்தால்* (ता) *என்று விஸர்க்கமன்னியில் இருக்கும்.* (उदा) जोहवीमि ता वाजम् । परि ता बभूव । सोमस्य ता मदे । अव आ वृणे । ता नः । सर्वा ता वि ष्य । स्रुचेव ता हविषः । याथ उग्रा ता न: । नाम स्थ ता वः ॥

* [प्राति] (1.1.28) 'इद्विदग्नइमान्नएनौषधीःपरस्सः' ॥ (प्रा, अ-५, सू-१७) इदु, इदग्ने, इमान्नः, एना, ओषधीः, *இந்த பதங்கள் பரத்திலிருந்தால் ஸம்ஹிதையில் விஸர்க்கம் லோபித்து* 'सः' *என்கிற பதம் ஸந்தியையடையும்.* (उदा) सेदु होता । सेदग्ने अस्तु । सेमान्नो हव्यदातिम् । सैनानीकेन । सौषधीरनुरुध्यसे ॥

* [प्राति] (1.2.3) 'ते मा पातन्नम एनमभि वायुर्गर्भमुपाहस्तुपरः' ॥ (प्रा, अ-४, सू-४२) मापातं, नमः, एनमभि, वायुः, गर्भं, उप, अहः, तु, *இந்த பதங்கள் பரத்திலிருந்தால்* (ते) *என்கிற பதம்* (प्रग्रह) *மாகும்.* (उदा) ते मा पातम् । पुनस्ते । नमोऽग्नयेऽप्रतिविद्धाय । ते एनमभि । ते वायुर्व्यवात् । ते गर्भमदधाताम् । ते उपामन्त्रयन्त । ते अहोरात्रयोः । ते त्वाव नोत्सृज्ये । शिल्पे स्थस्ते वाम् *என்கிறவிடத்தில்* (परश्चोभयोः) *என்கிற ஸூத்திரத்தினால்* (प्रग्रहत्वं) *கிடைத்தது.* ॥

* [प्राति] (1.2.26) 'ची यत्प्रपरः' ॥ (प्रा, अ-४, सू-३३) यत्, प्र, *இந்த பதங்கள் பரத்திலிருந்தால்* (ची) *என்கிற எழுத்தை முடிவிலுள்ள பதம்* (प्रग्रह) *மாகும்.* (उदा) ऐक्षवी तिरश्ची । प्राची प्रेतमध्वरम् ॥

(1) (1.3.2) (स+ल) । "स्युः स्थ भवन्ति भवन्तुपरो बहुधेति वर्जयित्वा ।" *ஆகாராந்தமாயிருக்கிற பதம்* स्युः, स्थ, भवन्ति, भवन्तु, *இந்த பதங்கள் பரத்தில் இருந்தால் விஸர்க்கத்தோடு கூடி இருக்கும்.*

(उदा) परापातुकास्स्युः । सँस्रावभागास्स्थ । प्रजा भवन्ति । इमा भवन्तु । 'स्युः' *முதலான பதங்கள் பரத்திலிருந்தாலும்* (बहुधा) *என்கிற பதத்திற்கு விஸர்க்கமில்லை.* बहुधा भवन्ति ॥

(1) (1.3.29) (स+ल) । "यो हि भुवः परो याज्यासु विश्वाः ।" "उभा वामिन्द्राग्नी" *முதல்* "अग्निर्वृत्राणि" *வரையில் பிரச்னங்களினுடைய முடிவிலிருக்கிற அநுவாகங்கள்,* "युक्ष्वा हि" *என்கிற அநுவாகம், இந்த* 23 *அநுவாகங்களுக்கும்* "याज्या" *என்று பெயர். இதுகளில்* यः, हि, भुवः, *இந்த பதங்கள் பரத்தில் இருந்தால்* "विश्वाः" *என்கிற பதம் விஸர்க்கத்தோடு கூடி இருக்கும்.* (उदा) विश्वा यः । विश्वा हि भूयाः । स विश्वा भुवः ॥

* (1.4.26) (स+शी) । 'शपूर्वस्य नकारस्य ञकारस्तैत्तिरीयके' ।

* [प्राति] (1.5.43) 'वीड्वारौ कृष्णश्चरावो यदापरः' ॥ (प्रा, अ-४, सू-३८) वीड्, द्वारौ, कृष्णः, चरावः, यदा, एतेषु पदेषु परेषु सत्सु, पदान्तस्थः ईकार एकारो वा प्रग्रहो भवति । (उदा) धिषणे वीडू । देवी द्वारौ । अतिष्ठमाने कृष्णः । ये चरावः । नन्नमाने । यदेदन्ताः ॥

* [प्राति] (1.7.13) 'लोक एवेष्टा' ॥ (प्रा, अ-३, सू-६) लोके, एव, इति आभ्यां परस्य 'इष्टा' इत्यवग्रहस्य अन्त्यस्वरः पदकाले ह्रस्वमाप्नोति । (उदा) सममुष्मिल्लोँक इष्टापूर्तेन । स त्वेवेष्टापूर्ती ॥{लोक एवेति किम्–इष्टापूर्ते सँसृजेथाम् ।}

(1) (1.7.22) (स+ल) । 'यज्ञे चोल्बणमेवोपह्वयध्वं परमिष्यते' । उल्बणम्, एव, उपह्वयध्वं, इति एतेषु पदेषु परेषु सत्सु 'यज्ञ' इति पदं विलङ्घ्यं भवति । 'यज्ञे' इति वक्तव्यम् । (उदा) एव यज्ञ उल्बणं क्रियते । यज्ञ एव यज्ञम् । यज्ञ उपह्वयध्वम् ॥ {ह्वयध्वमिति किम् । उप यज्ञ उप मा ।}

(1) (1.7.51) (व्यास+शीक्षा) । 'अथेतस्सविसर्गोषं पदिमह्योहिमोद्यवि । सोदिव्ययं कमूप्रोत्रीपूर्वोऽवग्रहपूर्वकः' ॥ पदि, महि, आपोहि, मो, द्यवि, सोदिवि, अयमु, कमु, ऊ, प्रो, त्री, एतेभ्यः परतः स्थितः अवग्रहपूर्वश्च सकारः संहितायां षकारमापद्यते ॥ (उदा) पदि षिताम् । महिषत् । आपो हि ष्ठ । मो षूणः । द्यवि ष्ठ । स्वानासो दिवि षन्तु । अयमु ष्य । कमु ष्वित् । ऊषुणः । प्रो ष्वस्मै । त्री षधस्था । शुचिषत् ॥ {नृषत्, वेदिषत्}

(1) (1.8.1) (स+ल) । 'त्यत्तस्मात्तदिति प्रोक्तं न नैर्निर्नोप नप्रति । नेमिन्नानु नविस्रंसयेतन्नयैषु परेषु तु' ॥ नैः, निः, नोप, नप्रति, नेमिं, नानु, नविस्रंसयेत्, नय, एतेषु पदेषु परेषु सत्सु (तं) इति पदविभागः करणीयः । अन्यत्र तदित्यवगन्तव्यम् । (उदा) तन्नैर्ऋतम् । तन्निरवपत् । तन्नोपाह्वयत । तन्न प्रतिप्रायच्छन्न् । तन्नेमिमृभवः । तन्नान्ववायन्न् । यत्तन्न विस्रँसयेत् । प्र तन्नय प्रतराम् ॥

(1) (2.3.3) (स+ल) (शमाने 6,7 सू) । 'आदित्याः न वपेत्पूर्वः' । वपेत्पूर्व आदित्याशब्दः घोषवत्परोऽपि विसर्जनीयान्तो न भवति ॥ निर्वपेदादित्या वै । {(2.3.3) ॥}

(2.6.68) प्रातिशाख्ये तृतीयोऽध्यायः ।

1. **अथ आदौ उत्तरे विभागे ह्रस्वं व्यञ्जनपरः ।**

2. देवा शीका सुम्ना श्वा ऋता वयुना हृदया अघा उक्था शुद्धा ।

3. इन्द्रा वद्वन्वान्परः ।

4. चित्रा वपरः ।

5. प्रस्था इन्द्रिया द्रविणा विश्वदेव्या दीर्घा वीर्या विश्वा वाता त्वा भङ्गुरा कर्णका वृष्णिया सुगोपा ऋक्सामा अद्या सत्रा वर्षा पुष्पा मेघा प्रा स्वा ।

6. लोके एव इष्टा ।

7. शक्ती रथी त्विषी वाशी रात्री ओषधी आहुती व्याहृती स्वाहाकृती ह्रादुनी शची चिती श्रोणी पृष्टी पूती अभी चर्षणी परी अधी पारी शत्रू विषू वसू अनू हनू सू विभू इति अवग्रहः ।

8. अवा सचस्वा नुदा मृडा वर्धा शिक्षा रक्षा अद्या भवा भजा यत्रा चरा पिबा ना धामा धारया धर्षा घा वर्धया बोधा अत्रा तत्रा मुञ्चा अश्वस्या* पृणस्वा हिष्ठा त्वन्तरा जनिष्वा युक्ष्वा अच्छा । (अश्वस्य वाजिनस्त्वचि, मेध्यस्य*)

9. अधाग्नियाज्ये ।

10. कुत्रा दक्षिणेना स्वेना हन्तना जगामा रुहेमा विद्मा ऋध्यामा चकृमा क्षामा स्तरीमा भरेमा वर्षयथा ईरयथा आरिथा पाथा अथा सिश्चथा जनयथा जयता उक्षता अवता याता श्रृणुता कृणुता बिभृता ।

11. भरता याज्यासु ।

12. अत्ता भवता अनदता तरता तपता जुहुता वोचता अमुञ्चता चृता घुष्या जनया वर्तया सादया पारया दीया हरा भरा अपा ससादा सृजा तिष्ठा येना ।

13. उश्मसी क्रयी* कृधी श्रुधी यदी । (सोमविक्रयी क्षोधुकः* प्रत्युदाहरणं पदत्वाभावात्)

14. सू तू नू मिथू मक्षू ऊ ।

15. व्युत्पूर्वः आन् अनुदात्तः अनूष्मवति अनूष्मवति ।

(प्राति अ-३, सू-९) अधाग्नियाज्ये । अधा, अग्नियाज्ये, इति छेदः । अग्निश्च याज्याश्चेति विग्रहे चार्थे द्वन्द्व इति द्वन्द्वे सर्वो द्वन्द्वो विभाषयैकवद्भवतीति एकवद्भावे रूपम् । चतुर्थकाण्डस्य अग्निरिति संज्ञा । तत्र तद्गुणप्रकाशनस्य सत्त्वात् । उभा वामिन्द्राग्नी प्रभृति अग्निर्वृत्राणि पर्यन्ताः प्रश्नान्ता अनुवाकाः युक्ष्वा हीत्यनुवाकश्च याज्यासंज्ञकाः भवन्ति । अग्निकाण्डाख्यचतुर्थकाण्डे च याज्यासंज्ञकोभावामित्याद्यनुवाकेषु च अधा इति पदं व्यञ्जनपरं ह्रस्वमाप्नोति । (उदा) अधा ह्यग्ने ऋतोः । अधा ते सुम्नमीमहे । अधा यथा नः ॥

**पूर्वदीर्घिणः**

वशान्नायाऽकवारि,म्महेन्द्राय माहेन्द्रस्यैतु,मैतोरष्टाश्रि,रष्टाक्षरेणाष्टाक्षर, मष्टाक्षराण्यष्टाक्षराष्टापद्येयातामार्पयन्ति, याज्यानु- वाक्ये, याज्यानुवाक्ययोर्याज्यानुवाक्याभ्यां याज्यानुवाक्याः परेत्य परोच्यः परोवप परापतत्परावधी,दाजे,दूर्वेष्टका,मान्त,-

माराग्रा, माराग्रा,ञ्जन,माङ्क,आञ्जीताजावयो जिह्वाग्रेण यथोदित,मेत्या,यनायविश्वाहा,ञ्जसायनी, आर्तोर्मेहेन्द्रं माहेन्द्रमित्येते पूर्वदीर्घिणः ॥

**उत्तरदीर्घिणः**

उपायवो विश्वायुरदब्धायो तिग्मायुधा वृद्धायु१ शतायुः सत्यायुः सर्वायुश्चित्रायुर्यज्ञायुधान्युपाप्नोति साशीर्केणोपावर्तताक्षावापस्य यवाचितं प्राप्नुयात्प्राप्तुं प्राप्नोति प्रेरते पुरुषाहुतिरुपाव्याध उपावर्त्स्यंति घृताहुतिर्घृताहवनो मध्यमेषायां प्राचीनावीतमुपावर्तत उपाकरोत्युपाकुर्यादप्राप्य साशिरमुपाकृतं वैश्वदेवाग्निमारुते उपागुः पुरीषायतनं सायतन१ श्वतातङ्क्षेन सात्मा यजमानायतनमुपावर्तते यत्राकूतायापात्मान१ सात्मानमुपाववर्त्युपाकृत्योपायन्ति तूषाधान१ हस्तादाना अपाकृतमुपाकृतमुपागामुपाकरोति निष्कृताहावमुपाकृतः शतायुषमुपावर्थ्स्यर्यत्युपावर्त्स्यतोप्रतीक्षं वीक्षिष्यते वीक्षमाणाय वीक्षिताय मृगाखरे इत्येतानि पदान्युत्तरदीर्घिणः ॥

**उभयह्रस्विणः**

उक्षान्नायोपावहरन्नुपावहरेदनवानं परार्धायेत्येते उभयह्रस्विणः ॥

**उभयदीर्घिणः**

पराह, दक्षिणावृतो, दक्षिणावृतं, यथायतनं यथायतनादित्येते उभयदीर्घिणः ॥

**अथ वाक्यान्ताः पञ्चाशतः**

उभा वा१ होतर्दोषागन्म सुवः सं ज्योतिषा सोमाय पितृमते सुवानः सोमो वर्धन्तु त्वा राजन्दिवोस्य जगतो रराणो वीहि कव्यवाहन पितॄन् कर्मण्यः स्वधायै नमो मन्यासै शं प्र देव१ सन्ते वायुरग्ने यं क्षये पाथा ध्रुवक्षितिरपामतिं व्रतमेकास्य सुमतावग्निर्वृत्राणि चर्षणीनां य इमा वीरश्शतमन्युः पयसा महीं गा१ सुहिरण्ये सुशिल्पे शुक्रास्ताः पुष्टं पशु मन्यते त्रि१शत् ॥30॥

(1) (3.4.8) (स+ल) । 'नैव पूर्वः' । पूर्वसूत्रात् पृथिव्या इति लभ्यते । 'एव' इत्येवंपूर्वः 'पृथिव्या' इति शब्दः विसर्जनीयान्तो न भवति । (उदा) वाचैव पृथिव्या यज्ञम् । 'इमे अलज एतयोश्च' । अत्र चशब्दः पृथिव्या इति शब्दस्य निषेधस्य च अनुकर्षकः । 'इमे वै सह, अलज आन्तरिक्ष' इत्येतयोरनुवाकयोः 'पृथिव्या' इति शब्दः विसर्जनीयान्तो न भवति । (उदा) द्यावापृथिव्या यत्सोमः । द्यावापृथिव्या श्वावित् ॥

(1) (3.5.10) (स+ल) । 'पृतना जपरः' । जपरः 'पृतना' शब्दः विसर्जनीयान्तो भवति । (उदा - पृतना जयामि ।) 'पृतना हवेषु' इत्यत्र न ॥

* (4.3.34) [प्राति] 'न धामासिपरो बुध्नियाज्याऽऽपूषामिनन्तार्षे' ॥ (प्रा, अ-१०, सू-१३) स्वयं पाठे, धा, मा, पा, एषाम् अन्त्यस्वरः असिपरः सन्धौ एकादेशं न गच्छति । (उदा) स्वधा असि । प्रमा असि । धन्वन्निव प्रपा असि । बुध्निया, ज्या, आपूषा, अमिनन्त, एषामन्त्यस्वरः स्वयं पाठे सन्धौ एकादेशं न गच्छति । (उदा) प्र बुध्निया ईरते । ज्या इयँ समने । आ पूषा एत्वा वसु । सुपर्णा अमिनन्त एवैः ॥

* (4.4.25) [प्राति] 'वाहन उह्यमानोयानमयन् यवेन वन् च' ॥ (प्रा, अ-७, सू-६) चशब्दः प्रपूर्व इत्यन्वादिशति । वाहनः, उह्यमानः, यानम्, अयन्, यवेन, वन्, एषु नकारः प्रशब्दे पूर्वे णकारमाप्नोति ।(उदा) विभूरसि प्रवाहणः । नरन्धिषः प्रोह्यमाणः । यस्य प्रयाणमनु । अयन्निति पदैकदेशो बहूपादानार्थः । (उदा) यज्ञस्य प्रायणम् । आदित्यः प्रायणीयः । प्रायणीये च । प्रयवेण पञ्च । यदि वा तावत्प्रवणम् ॥

* (4.7.9) [प्राति] 'त्रपुमिथुपूर्वश्शकारश्चपरः' ॥ (प्रा, अ-५, सू-४) संहितायां त्रपु, मिथु, इत्येतयोः पदयोः चकारादौ पदे परे सति शकार आगमो भवति । (उदा) त्रपुश्च मे । मिथुश्चरन्तमुपयाति ॥
* (5.2.38) [प्राति] 'इमे गर्भमुपैव रसेनपरः' ॥ (प्रा, अ-४, सू-२४) 'इमे' इत्यन्त्यस्वरः, गर्भं, उप, एवरसेन, एवंपरः प्रग्रहो भवति । (उदा) यदिमे गर्भमदधाताम् । इमे उपावत्स्यतः । इमे एव रसोनानक्ति । रसेनेति किम् । इम एवास्मै लोकाः । अत्र न ॥
(प्रा, अ-४, सू-२५), 'क्रूरमापस्सजूर्ब्रह्मजैतेषु च' । चकार 'इमे' इति शब्दमन्वादिशति । क्रूरं, आपः, सजूः, ब्रह्मज, एतेष्वनुवाकेषु 'इमे' इत्यन्त्यस्वरः पूर्वोक्तपरनिमित्ताभावेऽपि प्रग्रहो भवति । क्रूरमिव वा इत्यत्र, इमे वै रोदसी । आपो वरुणस्येत्यत्र, इमे एवोपधत्ते । सजूरब्द इत्यत्र, इमे अश्विना संवत्सरः । ब्रह्म जज्ञानमित्यत्र, न हीमे यजुषासुम् इत्यादि ॥
* (5.5.27) [प्राति] 'ग्नी' ॥ (प्रा, अ-४, सू-३६) 'ग्नी' इत्यन्त्यस्वरः प्रग्रहो भवति । (उदा) अन्तराऽग्नी पशूनाम् । विश्वामित्रजमदग्नी । (प्रा, अ-४, सू-३७), 'न हिपरः' । सान्निध्याल्लब्धः 'ग्नी' इत्यन्त्यस्वरः, हिपरो यदि प्रग्रहो न भवति । ऐन्द्राग्नी हि बार्हस्पत्या ॥
* (5.6.31) (स-ल) 'मामा, स्या,द्भवति, हि, जायते, य,न्मे, ज्योतिः परश्च' ॥ 'जा' इत्यनुवर्तते । चकारो निषेधाकर्षकः । मामाद्येवंपरः जा इति पदरूपशब्दः विसर्गान्तो न भवति । (उदा) मामा - प्रजा मामा हासीत् । मामेति किम् । प्रजा मा द्यावापृथिवी इत्यत्र सविसर्ग एव । स्यात् - प्रजा स्याद्वेदिसम्मिताम् । भवति - पापीयसी प्रजा भवति । हि - प्रजा ह्यात्मनः । जायते - अत्र्यस्य प्रजा जायते । यत् - प्रजा यन्मनुष्याः । मे - आ प्रजा म आ मा । ज्योतिः - प्रजा ज्योतिरिमम् ॥
प्रातिशाख्ये चतुर्थोऽध्यायः ॥
**अथ प्रग्रहाः** । नावग्रहः । अन्तः । इतिपरः अपि । ऊकारः । ओकारः असांहितः अकारव्यञ्जनपरः । समहदथपित्पूर्वः च । अथ एकारेकारौ । अस्मे । त्वे, इति अनिङ्ग्यान्तः । देवते, उभे, भागधे, ऊर्ध्वे, विशाखे, श्रृङ्गे, एने, मेध्ये, तृण्णे, तृद्ये, कनीनिके, पार्श्वे, शिवे, च उत्तमे, एव उत्तरे, शिप्रे, रथन्तरे, वत्सरस्य रूपे, विरूपे, विषुरूपे, सदोहविर्धाने, अधिषवणे, अहोरात्रे, धृतव्रते, स्तुतशस्त्रे, ऋक्सामे, अक्ते, अर्पिते, रैवते, पूर्ते, प्रत्ते, विधृते, अनृते, अच्छिद्रे, बहुले, पूर्वजे, कृणुध्वंसदने । अमी, चक्षुषी, कार्ष्णी, देवता फल्गुनी, मुष्टी, धी, नाभी, वपाश्रपणी, अहनी, जन्मनी, सुम्निनी, सामनी, वैष्णवी, ऐक्षवी, दर्वी, द्यावापृथिवी । पूर्वः च । न रुन्धे नित्यम् । हरी, सहुरी, सहूती, कल्पयन्ती, आ पृषती, आहुती । पूर्वः च । वाससी, तपसी, रोदसी । परः च । व्यचस्वती, भरिष्यती, नः पृथिवी । न उपस्थे । इरावतीप्रभृति आ दाधार । पूर्वजेप्रभृति आ अयम् । इमे, गर्भमुपैवरसेनपरः । क्रूरम् आपः सजूः ब्रह्मज एतेषु च । पूर्णे च । दृढे । घ्नीचक्रे पपरे । न्वती । पपरः न । समीची । नपरः न । ची यत्प्रपरः । आन्मही । पतीश्रुतिः । ग्नी । न हिपरः । वीड्वारौकृष्णश्चरावोयदापरः । न ज्ञे अह्ने नित्यम् । आकारैकारपूर्वः तु बहुस्वरस्य ते थे । न शार्याते । ते मापातन्नमएनम्भिवायुर्गर्भमुपाहस्तुपरः । अनुदात्तः न नित्यम् । एते तनुवौवैसमेवहियज्ञपदिष्टक्परः । परः च द्वयोः । स्थःपरः । परः च उभयोः । सोमाय स्व एतस्मिन् । द्वे । परः च । एकव्यवेतः अपि । गमयतः भवतः अनूकारात् परम् तनू यत् अकरोत् कुर्यात् इष्टिषु अब्रूताम्प्रवर्तास्तां स्तभ्नीतांवाचयतिबिभृतस्ताग्निङ्ग्ग्गायत्रन्ताभ्यामेवोभाभ्यामवान्तरम्परः आ षष्ठात् । न ग्रामी वर्चसी मिथुनी मासे लोके धत्ते । अते समानपदे नित्यम् अवे च अवे च ॥
-----------

तैत्तिरीयसंहिता-पदपाठः

परिष्कर्त्तारौ

मु० आ० वैद्यनाथशास्त्री मा० नारायणशास्त्री च

--------------

श्रीः ॥

तैत्तिरीयसंहितापदपाठः ॥

शेवधिर्यः पुमर्थानां षडध्वातीतविग्रहः । राद्धान्तो निगमार्थानां मोदतां स महेश्वरः ॥

पदानां कृष्णयजुषो लक्षणानि क्वचित् क्वचित् । वैद्यनाथो विलिखति सव्याख्यानि यथामति ॥

१ (1.1.28) 'इद्विदग्नइमान्नएनौषधीःपरस्सः' ॥ (प्रा, अ-५, सू-१७) इदु, इदग्ने, इमान्नः, एना, ओषधीः, इत्येतेषु परतः 'सः' इत्यत्र विसर्जनीयो लुप्यते । सेदु होता । सेदग्ने अस्तु । सेमान्नो हव्यदातिम् । सैनानीकेन । सौषधीरनुरुध्यसे । शिक्षायामपि लोपप्रकरणे - 'एनौषधीरिद्विदग्नइमान्नःपरतश्च सः' इति ॥ स्पष्टोऽर्थः ॥

------

१ (1.8.28) सप्तलक्षणे शमानप्रकरणे “न जोहवीमिपरिसोमस्यवृणेसर्वेवोग्रास्थपूर्वः” इति । अस्यार्थः - जोहवीमि, परि, सोमस्य, वृणे, सर्वा, इव, उग्रा, स्थ, इत्येतानि पदानि पूर्वाणि यस्मात् सः तथोक्तः घोषवत्परश्च पूर्वसूत्राल्लब्धः 'ता' इति पदरूपः शब्दः विसर्गान्तो न भवति । यथा । जोहवीमि ता वाजम् । परि ता बभूव । सोमस्य ता मदे । अव आ वृणे - ता नो मृडातः । सर्वा ता वि ष्य । स्रुचेव ता हविषः । याथ उग्रा ता न: । नाम स्थ ता वः ॥

१. (1.8.31) 'ब्रह्मन्' इत्यत्र नकारात्पूर्वस्य अकारस्य प्लुतत्वम् । मात्रात्रयेणोच्चारणीयः प्लुतः । तदुक्तं शिक्षायां - 'ह्रस्वः स्यादेकमात्रस्य द्विमात्रस्य तु दीर्घता । त्रिमात्रस्य प्लुतोऽचां हि पादो मात्राचतुर्थकः' इति ॥ प्लुताश्च परिगणिताः शिक्षायाम् - 'पत्नीवाश्चेतव्याः कार्याश्चित्या रभ्याः पताउच ॥ होतव्यां सत्यराजांश्च सृज्यां प्राश्याश्च मीयता ॥

कर्तव्या सहस्रामद्राक् सोमाः क्रामाश्च हा इति । ब्रह्मान्त्व द्विपदा हौषा स्थेया अग्नाइ वत्यगान् ॥

हावरत्नीश्छिनत्ती च जुहवानीच गच्छती । एतांलाजीञ्छाचीन् सर्वे त्वन्तोदात्ताः प्लुता इमे ॥

एते सर्वे शाचीनन्ताः अन्तोदात्ताः प्लुता इति विज्ञेयाः ॥

यथा, पत्नीवा(3)स्सजूः । न्यङ्ङग्निश्चेतव्या(3)ः । वायव्यः कार्या(3)ः । न विचित्या(3) इति । नान्वारभ्या(3)इति । यज्ञपता(3)विति । न होतव्या(3)मिति । सत्यराजा(३)न् । उत्सृज्या(3)न्न । प्राश्या(3)न्न प्राश्या(3)मिति । प्रचातुर्मास्ययाजी मीयता(3) न प्रमीयता(3) इति । द्वादशारत्नी रशना कर्तव्या(3) त्रयोदश । सहस्रा(3)मिति । सेति ह्रस्वेन किं ? साहस्रश्चिन्वीत । अद्रा(3)गित्याह । सोमा(3)न । इयद्द्वादश विक्रामा(3)इति । आत्मन् हा (3) इत्यह्वयत् । ब्रह्मा(3)न्त्वँ राजन् । द्विपदा(3)इति । माहौषा(3)मिति । नोपस्थेया(3)इति । गृह्णाम्यग्ना(3)इ । भवत्यगा(3)नग्नीत् । हा(3)वु हा(3)वु हा(3)वु । त्रयोदशारत्नी(3)रिति । सा न छिनत्ती(3)इति । जुहवानी (3)मा । कश्चन गच्छती(३) । सहस्रतम्यन्वेती(3) । लाजी(3) ञ्छाची(३)न् । अन्तोदात्ता इति किं ? पत्नीव इत्याह । न दिव्यग्निश्चेतव्य इति । उत्सृज्यमित्याहुः । सहस्रँ सम्पाद्य । ब्रह्मन्त्वमसि । द्वादशारत्नी रशना भवति । क इदमच्छैतीति । इत्यादौ मा भूत् । एवमादिविशेषणेन किं ? मन्दधियां सम्यक् प्लुतस्थानदर्शनमस्त्विति ॥

पत्याइति गृहाइ त्वी उत्ताना इत्यवेरपाः । सोमपा असोमपा द्वावश्रुताउवतिष्ठिपाय् ॥
सावित्रान्न वेत्था द्वौ व्यमग्निहोत्रान्नचेतिच । अवेत्योऽवभृथा ना द्वौ रभ्यःपशूश्शृतँहवीः ॥
स्थेयोऽग्नीधःस्विदासीद्वावस्तुहीइ वविन्दती ॥
एते प्लुता विशेषेण विज्ञेयाः । यथा, प्राजापत्या (3) इत्याहुः । इतीति किं ? ते प्राजापत्या आग्नेयौ । गृहा(3)इ न । इ इति किं ? गृहा भवन्तु । त्वी(3) इत्यब्रवीत् । पदोक्ते पदमिति न्यायात्, रभीयाँसमिव कृत्वी इत्यत्र प्लुतत्वं न भवति । उत्ताना(3) इति वयसाम् । इतीति किं ? उत्तान आङ्गीरसः । ननु उत्ताना(3) इत्यत्र मध्यमस्वरस्य प्लुतत्वं किन्न स्यात् ? उच्यते । सर्वेषां पदानां अन्त्यस्यैव प्लुतदर्शनात् । तर्हि गृहा(3) इ, यज्ञपता(3) उ, इत्यादावप्यन्त्यस्वरस्य किं न स्यात् । सुतरां परिहारः अवर्णप्लुतस्वरमिति । अवेरपा(3) इत्याह । अवेरिति किं ? केनाप इति । सोमपा(3) असोमपा(3) इति निगदव्याख्याताः । द्वौ इति किं ? सोमपा बाहुशर्द्धी । कश्चित्समश्रुता (3)उ । उ इति किं ? वाममश्रुतः । पुमान् । यज्ञं प्रत्यतिष्ठिपा (3) यज्ञपता(3)उ । वेत्थ सावित्रा(3)न्न वेत्था(3)इति । द्वाविति किं ? सावित्रं जुहोति । होतव्यमग्निहोत्रा(3)न्न होतव्या(3)मिति । व्यमिति किं ? अग्निहोत्रं जुहोति । न इति किं ? । पदद्वयमेकत्र वर्तते तत्पूर्वयोः प्लुतत्वमिति ग्रहणेऽपि तद्दार्ढ्यायायमारम्भ इति केचित् । अवेत्योऽवभृथा(3)ना(3)इति । द्वाविति किं ? अवभृथो यानि । आङ्गीरसायान इत्याह । मित्रन्न ईम् । अन्वारभ्यः पशू(3)र्न । रभ्य इति किं ? अग्ने पशुर्न यवसे । शृतँ हवी(3)श्शमितरिति । शृतमिति किं ? अथ तद्धविरिति । उपस्थेयोऽग्नी(3)र्न । स्थेयइति किं ? अग्निर्नाभिमृशे । अधःस्विदासी(3)दुपरि स्विदासी(3)त् । द्वाविति किं ? किँ स्विदासीत् । अस्तु ही(3)इत्यब्रूताम् । अस्त्विति किं ? न हीमे यजुषा । इ इति किं ? स्तुहि श्रुतं, इति केचित् । न त्वाभीरिव विन्दती(3) । वेति किं ? याभ्य एवैनं विन्दति ॥